श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामरत्नदशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामरत्नदशकम् ॥

वेणुनादलोलबालगोपिकाकदम्बकं
लीलयोद्धृतैकशैलगुप्तगोकदम्बकम्।
कामरूपकेलिलोलभूविलासिनीपतिं
राम राम राम रामनाम जल्प तारकम्॥ 1 ॥

राजराजमौलिरत्नराजिताङ्घ्रिपङ्कजं
राजराजसोदरोच्छिरस्सरोजभञ्जनम्।
रामशब्दगीतयुक्तयोगिमुक्तिदायकं
राम राम राम रामनाम जल्प तारकम्॥ 2 ॥

जानकीमनस्सरोजराजहंसविभ्रमं
पारिजातजातदेववन्दितोरुविक्रमम्।
पादपद्मरेणुधौतगौतमाङ्गनार्चितं
राम राम राम रामनाम जल्प तारकम्॥ 3 ॥

दूषणादिराक्षसेन्द्रदन्तिकेसरीश्वरं
सप्तसालभेदकृत्यदक्षदिव्यसायकम्।
कामितप्रदानदक्षकल्पवृक्षरूपिणं
राम राम राम रामनाम जल्प तारकम्॥ 4 ॥

शङ्करादिगीयमानपुण्यनामकीर्तनं
भानुकोटिकान्तिकान्तरत्नशेखराञ्चितम्।
सामगानलोलचित्तभक्तलोकनायकं
राम राम राम रामनाम जल्प तारकम्॥ 5 ॥

जातयातुधाननाशकारिकार्मुकोज्ज्वलं
पादरेणुलेशधौतगौतमप्रियानुतम्।
जानकीविलासलोलमानसं कृपानिधिं
राम राम राम रामनाम जल्प तारकम्॥ 6॥

भानुवंशवार्धिचन्द्रमिन्द्रनीलसुन्दरं
भारतीविलासनृत्तमण्टपायुताननम्।
बालभानुकोटितुल्यपीतवस्त्रसंवृतं
राम राम राम रामनाम जल्प तारकम्॥ 7॥

वारिजातपारिजातसूनशोभिकन्धरं
हारिहारशोभमानबाहुमध्यसुन्दरम्।
कामदेवकान्तिपूरसोदराङ्गवैभवं
राम राम राम रामनाम जल्प तारकम्॥ 8॥

भोगिराजभोगपीनबाहुदण्डमण्डितं
राजराजसोदरास्यपद्मशीतदीधितम्।
वालिसूनुशोकदानधीरधीरविक्रमं
राम राम राम रामनाम जल्प तारकम्॥ 9॥

नारदादियोगिबृन्दवन्द्यपादपङ्कजं
वारिदावलीनिकाशकायकान्तिसुन्दरम्।
शारदारविन्दपत्ररम्यदीर्घलोचनं
राम राम राम रामनाम जल्प तारकम्॥ 10॥

पापितापजातभेदकारणं गुणान्वितं
रामदिव्यनामयुक्तवृत्तपञ्चकद्वयम्।
भुक्तिमुक्तिदानबद्धचित्तवृत्तिमन्वहं
वक्ति यः शृणोति सोऽपि वाञ्छितं समीहते॥ 11॥

॥ इति श्रीरामरत्नदशकं समाप्तम् ॥